णनं किं।विद्युभूते ३ घातयिष्यामि त्वां।अदूराद्धूत इति न वक्तव्यं।पदांतग्रहणं तु कर्तव्यं॰ इह माभूत्॰ भद्रंकरो
षि गौ ३ रिति।शोभने माले ३।आमंत्रिते छंदसि प्लुते विकारोयं वक्तव्यः।अग्ना ३ इ पत्नीवा।तयोर्य्वावचि संहिता
यां।इ उतो यकारवकारौ स्तो विसंहितायां।अग्ना ३ याशा।पटा ३ वाशा।अग्ना ३ यिंदुं॰ पटा ३ वुदकं।अचि किं।अ
ग्ना ३ इ।संहितायां किं।अग्ना ३ इ इंद्रं॰ संहितायामित्याध्यायसमाप्तेरधिकारः।इ उतोरसिद्धत्वादयमारंभः।सवर्ण
दीर्घत्वस्य शाकलस्य वा निवृत्त्यर्थो यववयोरसिद्धत्वात्।उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्यस्य बाधना
र्थं वा।मतुवसो रु संबुद्धौ छंदसि।रु इत्यविभक्तिको निर्देशः।मत्वंतस्य वस्वंतस्य च रुः स्यात्॰ अलोंत्यपरिभाष
या नकारस्य।इंद्र मरुत्व इह पाहि सोमं।हरिवो मेदिनं त्वा।छंदसीर इति वत्वं।दाश्वान्साह्वान्मीढ्वांश्च।एते क
स्वंता निपात्यंते॰ मीढ्वस्तोकाय तनयाय।वन उपसंख्यानं॰ कनिब्वनिपोः सामान्येन ग्रहणं अनुबंधस्येहानिर्दे

छांदसो व्यत्ययइति प्रांचः। एवं च सूत्रस्य फलं चिंत्यं। स्वतवान्पायो। रुर्वा। भुवस्त स्पस्वतवाँ पायुरग्ने। छंदसि वाप्राय

सि॰वे॰ याम्रे॰ पस्वायंतं वसुनाम्रेनरित्व॥ इणः॥ क्वनिप्॰ उभयथर्क्षु। अम्परेछवि नस्य रुर्वा। पक्षं तां स्वक्रो दीर्घइटिस पसूत्र तात्र चक्रे १

१७ मानपादे। [redacted]

दीर्घान्नुकारस्य रुर्वा स्यादटि तो देवन्नारो एकपादस्थौ स्याता। देवाँ अच्छा सुमती। महांइंद्रो

17 यश्रोजसा। उभयथर्क्षु। पक्षेरुत्वेनेह आदित्यासा वि कामहे। आतोटि नित्यं। अटिपरतः शेः पूर्वस्यातः स्थाने नित्य

मनुनासिकः॥ महाँ इंद्रः। नेत्त्रिरीया स्तुअनुस्वारमधीयते। नश्छव्यप्रशान्। ... तयोः॥ विसर्गस्य सो वा स्यात्कुप्वोः प्रश

त्रृपाम्रेडितं च वर्जयित्वा। अयेत्रातरन्तस्कविः। गिरिर्नविश्वतस्पृथुः। नेह॰ वसुनः॥ पुर्भः पातिः। अप्रेत्यादि किं। अ

ग्निः प्रविद्वान्। परुषः॥ परुषः। कः करत्करतिकृधिकृतेष्वनदितेः। विसर्गस्य सः॥ स्यात्। प्रदिवो अपस्कः। यथा

नो वस्यसस्करत्। सुपेशसस्करति। उरुणस्कृधि। सोमं नवाः रुमघवत्सुतस्कृतं। अनदितेरिति किं। यथानो अदितिः राम

करत्। पंचम्याः परावध्यर्थे। पंचमीविसर्गस्य सः स्यादुपरि भावार्थे परिशब्दे परतः॥ दिवस्परि प्रथमं जज्ञे। अध्यर्थे किं। १७

दिवस्पृथिव्याः॥ पर्यर्जिः। पातौ च बहुलं। पंचम्यां इत्येव॰ सूर्योनो दिवस्पातु। षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु

वर

वाचस्पतिं विश्वकर्माणं। दिवस्पुत्राय सूर्याय। दिवस्पृष्ठं स्यंदमानः। तमसस्पारमस्य। परि वीतइलस्पदे। दिवस्य
यो दिवि धाणाः। रायस्पोषं यजमानेषु। इडाया वा पतिपुत्रादिषु परेषु। इलायास्पुत्रः। इलायाः पदे। निसस्तप
तावनासेवने। निसः सकारस्य मूर्द्धन्यः स्यात्। निष्टप्तंरक्षो निष्टप्ता अरातयः। अनासेवने किं। निस्तपति पुनः पु
नस्तपतीत्यर्थः॥ युष्मत्तत्ततक्षुःष्वंतःपादं। पादमध्यस्थस्य सस्य मूर्द्धन्यः स्यात् तकारादिषु परेषु युष्मदादेशाः॥
त्वं त्वा ते तव वाः। त्रिभिष्ट्वं देवसवितः। तेभिष्ट्वा। अग्निष्टे। अप्स्वग्ने सधिष्टव। अग्निष्टे विश्वं। द्यावापृथिवी निष्ट
तक्षुः॥ अंतःपादं किं। तदग्निस्तदर्यमा। यन्म आत्मनो निन्दाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः। अत्राग्नि
रिति पूर्वपादस्यान्तो न तु मध्यः॥ यजुष्येकेषां। युष्मत्तत्ततक्षुषु परतः सस्य मूर्द्धन्यो वा। अर्चिभिष्ट्वं अग्निष्टे यं।
आर्चिभिष्टं तन्। पहे। विश्वामित्यादि। स्तुतस्तोमयोश्छंदसि। त्रिभिष्टुतस्य। त्रिभिः स्तुतस्य। गोष्टोमं। गोस्तोमं। पूर्व
पदादित्येव। सिद्धे प्रपंचार्थमिदं। पूर्वपदात्। पूर्वपदस्थान्निमित्तात्परस्य षत्वं वा। यदिशादि विषयः। युर्वहिस्थस्वर्प
ती। ऋतुज्ञः॥ पूर्वपदस्थान्निमित्तादुत्तरस्य सुजो निपातस्य सस्य षः॥ ऊर्द्धू ऊ षुणः॥ अभीषुणः॥ सनोत्तरनः। गोषाइं

सि०वै०
१८
18

दोनृषाश्रसि। अनः४ किं। गोमतिः। सहेःपृतनर्तभ्यांच। पृतनाषाहं·ऋताषाहं। वातजूतोषाहं। नियमिभ्यो
ड्व्यवायेवाछंदसि। सस्यमूर्द्धन्यः४। न्यषीदत्। अभ्यष्टौत्। अभ्यस्तौत्। छंदस्यृदवग्रहात्। ऋकारांतादवग्रहा
त्परस्यनस्यणः४। नृमणाः४। पितृयाणं। नश्चधातुस्थोरुषुभ्यः। धातुस्थात् अग्नेरक्षाणः। शिक्षाणोअस्मिन्
।उरुणस्कृधि·अभीषुणः४। मोषुणः॥ ॥इत्यष्टमः४॥ ॥अथस्वरप्रकरणं॥ ॥अनुदात्तंपदमेकवर्जं।
परिभाषेयंस्वरविधिविषया। यस्मिन्पदेयस्योदात्तः४ स्वरितोवाविधीयतेतमेकमचंवर्जयित्वाशेषंतत्
पदमनुदात्ताच्कंस्यात्·गोपायतंनः४। अत्रसनाद्यंताइतिधातुत्वेधातुस्वरेणयकाराकारउदात्तः। शिष्टमनु
दात्तं·सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यइतिवाच्यं। तेनोक्तोदाहरणेगुपेर्धातुस्वरः। आयस्यप्रत
यस्वरश्चनशिष्यते। अन्यत्रेतिकिं। यज्ञंयज्ञमभिवृधेगृणीतः४। अत्रसतिशिष्टोपिश्नाइत्यस्यस्वरोनशिष्य
तेकिंतुतस्यएव। अनुदात्तस्यचयत्रोदात्तलोपः४। यस्मिन्ननुदात्तेपरेउदात्तोलुप्यतेतस्योदात्तःस्यात्। राम
देवीवार्यं। अत्रङीउदात्तः४। चौ। लुप्ताकारेऽञ्चतौपरेपूर्वस्यांतोदात्तः४। उदात्तनिवृत्तिस्वरापवादः४। देवद्री। १८

वी निपतदेवयंतः । अन्तादुत्तिदूति वा । आंदाधीवः । माधूवः । प्रत्ययस्वरएवात्र ॥ आमंत्रितस्य च । आमंत्रितवि
भक्त्यंतस्यादिरुदात्तः स्यात् । अग्न इंद्र वरुण मित्र देवाः । आमंत्रितस्य च । पदात्परस्यापादादिस्थस्यामंत्रितस्य
सर्वस्यानुदात्तः स्यात् । प्रागुक्तस्य षाष्ठस्यायमपवादः । यमाष्टमिकः । इमं मे गंगे यमुने सरस्वति । अपादादौ किं । श्रुतु
द्रि सोमं । आमंत्रितं पूर्वमविद्यमानवत् । अग्न इंद्र । अत्रेंद्रादीनां निघातो न । पूर्वस्याविद्यमानत्वेन पदात्परत्वाभावा
त् । नामंत्रिते समानाधिकरणे सामान्यवचनं ॥ समानाधिकरणे आमंत्रिते परे विशेष्यं पूर्वमविद्यमानवन्न । अ
ग्ने तेजस्विन् । अग्ने त्रातः । सामान्यवचनं किं । पर्यायेषु मा भूत् । अघ्ने देवि सरस्वति । विभाषितं विशेषवचने ।
अत्र भाष्यकृता बहुवचनमिति पूरितं । आमंत्रितांते विशेषणे परे पूर्वं बहुवचनांतमविद्यमानवद्वा । देवीः
षळुर्वीरुरु नः कृणोत । अत्र देवीनां विशेषणं षडिति । देवाः शरण्याः । इह द्वितीयस्य निघातो वैकल्पिकः
सुबामंत्रिते पराङ्गवत्स्वरे । सुबंतमामंत्रिते परे परस्यांगवत्स्यात् स्वरे कर्तव्ये । द्रवत्पाणी शुभस्पती । शुभ इ
ति शुभेः क्विबंतात् षष्ठ्यंतं । तस्य परशरीरानुप्रवेशे षाष्ठिकमामंत्रिताद्युदात्तत्वं । न याष्टमिको निघातः

सि० कौ०
१९

19

शं क्यः। पूर्वामंत्रितस्याविद्यमानत्वेन पादादित्वात्। यज्ञे दिवो दुहितर्मर्त्तभोजनं। दुह दिवः शङ्कस्याष्टमिकोनि
घातः। षष्ठ्यामंत्रितकारकवचनं। षष्ठ्यंतमामंत्रितांतं प्रतियत्कारकं तद्वाचकं चेति परिगणनं कर्त्तव्यमि
त्यर्थः। तेनेह न। अयमग्ने जरिता। एतेनाग्ने ब्रह्मणा। समर्थानुहृत्स्याद्वा सिद्धं। पूर्वांग वद्वेति वक्तव्यं। आतेपि
तर्मरुतां। प्रतित्वा दुहितर्दिवः। अव्ययानां न। उच्चैरधीयानः। अव्ययीभावस्यापि निघातः। उपाग्न्यधीयानः। उदात्त
स्वरितयोर्यणः स्वरितोनुदात्तस्य। उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात्। अ
प्स्वमिहि। स्वरितयणः। खलप्व्याशा। अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाद्धेष निघातो न। एकादेश उदा
त्तेनोदात्तः। उदात्तेन सहैकादेशः स्वरितो वा स्यात्। पहेपूर्वसूत्रेणोदात्तः। वी २ दं ज्योतिर्हृदये। अस्य श्लोको दिवी
यते। व्यवस्थितविभाषात्वादिकारयोः स्वरितः। दीर्घप्रवेशोदात्तः। किंच एङः पदांतादिति पूर्वरूपे स्वरित एव।
ते वदन्तु सोरूपमागात्। उक्तं च प्रातिशाख्ये। इकारयोश्च प्रश्लेषे क्षैप्राभिनिहतेषु चेति। उदात्तादनुदात्तस्य
स्वरितः। उदात्तात्परस्यानुदात्तस्य स्वरितः स्यात्। अग्निमीले। अस्या [illegible] सिद्धत्वाद्धेष निघातो न। तमीशानासः।
पृ१ राम
१९

उदात्तः स्यात्। योष्या। श्लावरंमरुतः [illegible] दीप रेउ दात्तेन सहैकादेशः ५

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानां। उदात्तपरः स्वरितपरश्चानुदात्तः८स्वरितो न स्यात् गार्ग्या-
दिमते तु स्यादेव। प्रयश्वा आरुः। वोश्वाः क्वा २३। १।२।३२८। एकश्रुति दूरात्संबुद्धौ॥ दूरात्संबोधने वाक्यमेकश्रुति
स्यात्। त्रैस्वर्यापवादः८। आगच्छ भो माणवक। यज्ञकर्मण्यजपन्यूङ्खसामसु। यज्ञक्रियायां मंत्र एकश्रुतिः
स्याज्जपादीन्वर्जयित्वा। अग्निर्मूर्द्धा दिवः८। यज्ञेति किं। स्वाध्यायकाले त्रैस्वर्यमेव॰ अजेति किं। ममाग्ने वर्चो
विहवेष्वस्तु। जपो नाम उपांशुप्रयोगः यथा जले निमग्नस्य॰ न्यूङ्खा नाम षोडश ओकाराः८। गीति सामाख्या।
उच्चैस्तरां वा वषट्कारः८। यज्ञकर्मणि वौषट्शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा। विभाषा छंदसि। छंदसि
विभाषा एकश्रुतिः८ स्यात्॰ व्यवस्थित विभाषेयं॰ संहितायां त्रैस्वर्यं॰ ब्राह्मणे एकश्रुतिर्बह्वृचानां। अन्येषा-
मपि यथासंप्रदायं व्यवस्था। न सुब्रह्मण्यायां स्वरितस्य तूदात्तः८। सुब्रह्मण्याख्ये निगदे यज्ञकर्मणीति
विभाषा छंदसीति च प्राप्ता एकश्रुतिर्न स्यात्स्वरितस्योदात्तश्च स्यात्॰ सुब्रह्मण्योम्। असावित्यंतः। तस्मिन्ने-
व निगदे प्रथमांतस्यांत उदात्तः८ स्यात्॰ गार्ग्यो यजते॰ जिह्वा तस्याप्य आद्युदात्तो नेन बाध्यते। अमुष्येत्यंतः।

सि·वै·
१०
७०

षष्ठ्यंतस्यापिप्राग्वत्·दाक्षेः पितायजते।स्यांतस्योपोत्तमंच।वादंतः॥तेनद्व्यनुदात्तौ।गार्ग्यस्यपितायजते।
वानामधेयस्य।स्यांतस्यनामधेयस्यउपोत्तमम्‌उदात्तंवास्यात्·देवदत्तस्यपितायजते।देवब्रह्मणोरनुदात्तः॥
अनयोःस्वरितस्यानुदात्तःस्यात्सुब्रह्मण्यायां।देवाब्रह्माणआगच्छत।स्वरितात्संहितायामनुदात्तानां।स्वरिता
त्परेषामनुदात्तानांसंहितायामेकश्रुतिः स्यात्·इमंमेगंगेयमुनेसरस्वति।उदात्तस्वरितपरस्यसन्नतरः।उ
दात्तस्वरितौपरौयस्मात्तस्यानुदात्तस्यानुदात्ततरःस्यात्·स्वरस्वतिशुतुद्रि।व्यवहृत्यस्वः।तस्यपरमाम्रेडितं
अनुदात्तंच।द्विरुक्तस्यपरंरूपमनुदात्तंस्यात्।दिवेदिवे॥ ॥इतिसाधारणस्वराः॥ ॥धातोः।अंतउदात्तः
स्यात्·गोपायतंनः॥अभिसत्यः।स्वपादिहिंसामच्यनिटि।स्वपादीनांहिंसेश्चानिघञ्दौलसार्वधातुकेपरे
आदिरुदात्तोवास्यात्।स्वपादिरदादिगणः॥स्वपंति·स्वपंति।श्वसंति।हिंसंति।पक्षेप्रत्ययस्वरेणमध्योदा राम
त्तता।क्तित्येवेत्युक्ते।नेहस्वपानि।हिनसानि।अभ्यस्तानामादिः॥अनिघञ्दौलसार्वधातुकेपरेअभ्यस्तानामादि १०
रुदात्तः।येददतिप्रियाणिवसु।परत्वाच्चित्स्वरमप्यंबाधते।दधानाइंद्रे।अनुदात्तेच।अविद्यमानोदात्तेलसार्वधातुके

परेऽभ्यस्तानामादिरुदात्तः८दधासि रत्नं द्रविणं च दाशुषे।भी ह्री भृ हु मद जन धन दरिद्रा जागरां प्रत्ययात्पूर्वं पि
ति।भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात्।यो अग्निहोत्रं जुहोति।ममत्तु नः
परिज्मा।मातापद्धीरं दधनन्।जागाथिर्त्विं।लिति।प्रत्ययात्पूर्वमुदात्तं।चिकीर्षकः८।आदिर्णमुल्यन्यतरस्यां। १३
अभ्यस्तानामादिरुदात्तो वा स्याण्णमुलि परे।लोलूयं लोलूयं।पक्षे लित्स्वरः८।अचः कर्तृयकि।उपदेशेऽजंतानां
कर्तृयकि परे आदिरुदात्तो वा।लूयते केदारः८स्वयमेव।चङ्यन्यतरस्यां।चङि धातूनामुपोत्तममुदात्तं वा।मा
हि चीकरतं।धात्वकार उदात्तः।पक्षे अन्तरे च उदात्तः८।। ।।इति धातुस्वराः।। ।।कर्षात्वतो घञोन्त उदात्तः।कर्षे
र्धातोराकारवतश्च घञंतस्यांत उदात्तः८स्यात्।कर्षः८।शपानिर्देशात्तुदादेराद्युदात्त एव।कर्षः।पाकः।उ
ञ्छादीनां च।अंत उदात्तः८स्यात्।उञ्छादिषु युगशब्दो घञंतो ऽगुणो निपात्यते।कालविशेषे रथाद्यवयवे च।वै
श्वानरः कुशिके भिर्युगे युगे।अन्यत्र योगे योगे तवस्तरं।भञ्जशब्दो घञंतः८।गावः८सोमस्य प्रथमस्य भक्षः।उत्त
मशब्दस्तमावपि।उडुगमं वरुणं।शश्वत्तममीलते।चतुरः शसि।चतुरो अंत उदात्तः८शसि परे।चतुरः कल्पयंतः८।

सि॰वै॰ २१ 21 अविरइतिरादेशस्यपूर्वविधौस्थानिवत्वान्नेह॥ वृतस्त्र८पथ्या। चतेरुरन्॥ निष्ठा दाद्युदात्तनाः। ऊन्दु
पोन्नमं। बहूत्रिचतुर्भ्योयाऊलादिर्विभक्तिरन्तोदात्तपदेन्नपोन्नममनुदात्तस्यात्॥ अध्वर्युभिःपंचभिः। नवभिर्वा
जेनवतीचा। सप्तभ्यो जायमानः८। आदशभिर्विवस्वतः८। उपोत्तमं किं। आषड्भिर्हूयमानः८। विश्वैर्देवैस्त्रिभिः।
ऊलिकिं। नवानानवतीनां। विभाषाभाषायां। उक्तविषये। सर्वस्य सुपि। सुपिपरे सर्वशब्दस्यादिरुदात्तः स्या
त्। सर्वेनंदंतियशसा। ञ्नित्यादिर्नित्यं। जिदंतस्यनिदंतस्य चादिरुदात्तः८। यस्मिन्विश्वानिपौंस्या। पुंसः कर्म
णि ब्राह्मणादित्वात्ष्यञ्॥ सुमेदधिष्वनश्वनः८। वायतेरसुन्। वायेरन्नेक्रुस्वप्वेति चकारादसुनोनुडागमः८। प
थिमथोःसर्वनामस्थाने। आदिरुदात्तः स्यात्॥ अयंपंथाः८। सर्वनामस्थाने किं। ज्योतिष्मतः पथो रक्ष। उदात्तनि
वृत्तिस्वरेणांतोदात्तं पदं। अंतश्च तवैयुगपत्। तवैप्रत्ययांतस्याद्यंतौयुगपदुदात्तौस्तः८। हर्षसेदातवाउ। क्षयो नि
वासे। आद्युदात्तः स्यात्॥ स्वे क्षये शुचिव्रत। एरजंतः। जयः करणं। करणवाची जयशब्द आद्युदात्तः८। जयत्यनेन राम
नजयोऽश्वः। वृषादीनांच। आदिरुदात्तो नत्वा कारः८दत्तः८। धवत्र्किं। विंतितः८। अनात्किं। आतः८। संज्ञायामित्यनु २१
दात्तः॥ आकृतिगणोयं। वातेनिर्वाजिनीवती। इंदं वाणीः। निष्ठा च द्व्यजनात्। निष्ठांतस्य द्व
संज्ञाय
टिरु

वृत्ते नेह। कृतं हृतं। शुष्कधृष्टौ। एतौ वाद्युदत्तौ स्तः। असंज्ञार्थमिदं। अत्र समन्नशुष्कं। आशितः कर्त्ता। कर्तृवाची आ
शितशब्द आद्युदात्तः। कृपं नित्यफलं आशितं। संज्ञायामुपमानं। उपमानशब्दः संज्ञायामाद्युदात्तः। चंचेव चं
चा। कनो वलुप्। एतदेव ज्ञापयति क्वचित्स्वरविधौ प्रत्ययलक्षणं नेति। संज्ञायां किं। अग्निर्माणवकः। उपमानं किं।
चैत्रः। रिक्ते विभाषा। रिक्तशब्दे वादिरुदात्तः। रिक्तः। संज्ञायां तु निष्ठा च द्व्यजनादिति नित्यमाद्युदात्तत्वं पूर्वविप्रति
षेधेन। जुष्टार्पिते च छंदसि। आद्युदात्ते वा स्तः। नित्यं मंत्रे। एतत्सूत्रं शक्यमकर्तुं। जुष्टो दमूनाः। बलरआङर्पितः ऊत्सा
देः पूर्वेणैव सिद्धः। छंदसि पाठस्य व्यवस्थितत्वया विपरीतापादनायोगात्। अर्पिताः षष्टिर्न चलाचलासः उत्सत्रांतो
दात्तदर्शनाद्वा। युष्मदस्मदोर्ङसि। आदिरुदात्तः स्यात्। नहि षस्तव नो मम। ङयि च। तुभ्यं हि त्वा नः। मह्यं वातः पवतां।
यतोऽनावः। यत्प्रत्ययांतस्य द्व्यच आदिरुदात्तः। ईड्यो नूतनैरुत। आ नु क्वान ईड्यो वंद्यः। श्रेष्ठं नो धेहि वार्यं। उ
क्थमिंद्राय शंस्यं। विभाषा वेण्विंधानयोः। आदिरुदात्तः। इंधानो अग्निं। त्यागरागहासकुहश्वठक्रथानां। आदि
रुदात्तो वा। आद्यास्त्रयो घञंताः। त्रयः पचाद्यजंताः। मतोः पूर्वमात्संज्ञायां स्त्रियां। मतोः पूर्व आकार उदात्तः। स्त्री ना

सि॰कौ॰ म्नि। उदुंबरावती। शरावती। अंतोवत्याः४। अवतीशब्दस्यांतउदात्तः४। वेत्रवती। उ०। पः४। पिञ्चादनुदात्तत्वंप्राप्तं। ईवत्याः।
१२ ईवत्यंतस्यापि प्राग्वत्। अहीवती। कृमीवती॥ ❀॥ अथ फिट्सूत्राणि। फिषोंतउदात्तः। प्रातिपदिकं फिट्। तस्यां
२१ तउदात्तः४ स्यात्। उच्चैः४। पाटलापालंकांबासागरार्थानां। एतदर्थानामंतउदात्तः४। पाटलाफलेरुहा सुरूपा
पाकलेति पर्यायाः४। लघावंत इति प्राप्ते। अपालंकव्याधिघातआरेवतआरग्वधेति पर्यायाः४। अंबार्थः माता।
उनर्वंतानामित्याद्युदात्ते प्राप्ते· सागरः समुद्रः४। गेहार्थानामस्त्रियां। गेहं न[illegible]ष यस्येति प्राप्ते। अस्त्रियां किं·शा
ला। अद्युदात्तोयं। इहैव पर्युदासाज्ज्ञापकात्। गुदस्य वा। अंतउदात्तः स्यान्नतु स्त्रियां। गुदम्। अस्त्रियां किं। आंत्रे
भ्यस्ते गुदाभ्यः। स्वांगशिटामदंतानामिति अंतरंगमाद्युदात्तत्वं। नतष्टाप्। ध्यपूर्वस्य स्त्री विषयस्य। धकारयकार
पूर्वे योत्यो वृत्स उदात्तः। अंतस्थौ। स्त्रीविषयवर्णनाम्नामिति प्राप्ते। छाया·माया·या तस्यान्तात्पूर्वमित्याद्युदात्ते राम
त्वे प्राप्ते। स्त्रीति किं। बाह्यं। पञ्जंतत्वादाद्युदात्ते· विषयग्रहणं किं। इभ्या·क्षत्रिया। यतोनावइत्याद्युदात्ते इभ्यशब्दः४। २२
क्षत्रियशब्दस्तु यांतस्यांत्यात्पूर्वमिति मध्योदात्तः। खांतस्याश्मादेः४। नखं· उखा· मुखं· दुःखं·दुः खं नखस्य स्वांगशि

टामित्याद्युदात्ते प्राप्ते। उखानाम भांडविशेषः। तस्य कृत्रिमत्वात् स्वपुर्वर्णं कृत्रिमाख्यावेदित्सुवर्णस्यो दात्तत्वे प्रा
प्ते॰ सुखदुःखयोर्न विषयस्येति प्राप्ते॰ अश्मादे ८ किं। शिखा॰ मुख॰ मुखस्य स्वाङ्गशिटामिति न विषयस्येति वा आ
द्युदात्तत्वं। शिखाधास्तु शीङः खो निद्ध्रस्वश्चेति उणादिषु निष्पोक्तेः अन्तरङ्गत्वाट्टापः प्रागेव स्वाङ्गशिटामिति
वाद्योध्यं। हिष्ठवत्सरतिशत्स्यान्तानां। एषामन्त उदात्तः स्यात्। अतिशयेन वृद्धो वंहिष्ठः। निस्वादाद्युदात्ते प्राप्ते।
वंहिष्ठेरश्वैः सुवृता रथेन। यद्वंहिष्ठं नातिविधे सुदानो व्यत्ययादाद्युदात्तः। संवत्सर ८। अव्ययपूर्वपदप्रकृति
स्वरोत्र बाध्यते इत्याहुः। सप्ततिः। अशीतिः। लघावन्त इति प्राप्ते। चत्वारिंशत्॰ इहा पित्रा वतः। अभ्यूणविनाम्
भृथस्याद्योः। अव्ययपूर्वपदप्रकृतिस्वरोत्र बाध्यते इत्याहुः। धाय्यादिसूत्रेण गतार्थमेतत्। दक्षिणस्य साधौ। अ
न्त उदात्तः स्यात्। साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया स्वाङ्गशिटामित्याद्युदात्तः। अर्थान्तरे तु लघावं
त इति गुरुरुदात्तः। दाक्षिणः सरलोदारपरच्छन्दानुवर्तिष्विति कोशः। स्वाङ्गाख्यायामादिर्वा। इह दक्षिणस्याद्यं
तौ पर्यायेणोदा[illegible]त्तः। दक्षिणो बाहुः। आख्याग्रहणं किं। प्रत्यङ् मुखमासीनस्य वामपार्श्वो दक्षिणो भवति। छंद

सि०कौ० सिव। अस्वांगार्थमिदं दक्षिणः। इह यथयथिणाघं नाघुदात्तो। कृष्णस्य मृगाख्या चेत्। वर्णानां तणे न्त्याद्युदात्ते प्राप्ते
२३ अंतोदात्तो विधीयते। कृष्णानां व्रीहीणां। कृष्णो नोनाव वृषभः। मृगाख्यायां तु कृष्णो रात्र्यै वा नामधेयस्य। कृष्ण
२३ स्यैसेव। अयं वा कृष्णः। श्विना। कृष्ण ऋषिः। शुक्लगौरयो रादिः। नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्तते इति तु युक्तः।
सरोगोरोयथापिवेत्यत्रांतोदात्तदर्शनात्। अंगुष्ठोदकवकवशानां छंदस्यंतः। अंगुष्ठस्यस्वांगानाममकुर्वीदी
नामिति द्वितीयस्योदात्तत्वे प्राप्ते नोदात्तार्थआरंभः। वशाग्रहणं नियमार्थं छंदस्येवेति। तेन लोके आद्युदात्त
तेस्याद्रुः। पृष्ठस्य च। छंदस्यंत उदात्तः स्यात्। वा भाषायां। पृष्ठं। अर्जुनस्य तृणाख्या चेत्। उनर्वन्नामिति साघुदा
त्तस्यापवादः। अर्यस्य स्वाम्याख्या चेत्। यांतस्यांतः स्यात्पूर्वमिति यतो नाव इति वाघुदात्ते प्राप्ते वचनं। आशाया अदि
गाख्या चेत्। दिगाख्याव्याप्त्यर्थमिदं। अन्तए वज्रापत्नी हिकम्पयायिस्याघुदात्तता। इन्द्राशामस्य रि। नक्षत्राणा राम
माशिषयाणाम्। अंत उदात्तः स्यात्। अश्लेषानुराधादीनां लघावंत उतिप्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नंतं २३
त्वेनाघुदात्ते प्राप्ते वचनं। नकुपूर्वस्य कृत्तिकाख्या चेत्। अंत उदात्तो न। कृत्तिका नक्षत्रम्। केचित्तु पूर्वोयस्याप्यद्विष

स्वा १

याणमिति क्यौं[illegible] यश्चापिकावङ्कलिका इत्यत्राद्यं नोदात्तो नेत्याद्युः घृतादीनां च। अंत उदात्तः। घृतं मिमिक्षे। आ
कृतिगणोयं। ज्येष्ठकनिष्ठयोर्वयसि। अंत उदात्तः स्यात्। ज्येष्ठ आहवमसा। कनिष्ठ आहव नुरः। वयसि किं। ज्येष्ठः श्रे
ष्ठः। कनिष्ठो[illegible]कः। इह निर्त्वादाद्युदात्त एव। बिल्वतिष्ययोः स्वरितो वा। अनयोरंतः स्वरितो वा स्यात्। पक्षे उदा
त्तः। इति फिट्सूत्रेषु प्रथमः पादः॥ ॥अथादिः प्राक्शकटेः। अधिकारोयं। शाकटिशकट्योरिति यावत्। ह्रस्वां
तस्य स्त्रीविषयस्य। आदिरुदात्तः स्यात्। वलिः। तनुः। नब्विषयस्यानिसंतस्य। वनेन वायः। इसंतस्य तु सर्पिः। नपुंसके।
तृणधान्यानां च द्व्यषां। द्व्यचामित्यर्थः। कुशाः। काशाः। माषाः। तिलाः। बह्वचां तु गोधूमाः। त्रः संख्यायाः। पंच। ष्ठा
गशिटामदंतानां। शिट् सर्वनाम। कर्णाभ्यां तु षुषु वुका दधि। ओष्ठाविव मधुः। विश्वो विहायाः। प्राणिनां कुपूर्वं। क
वर्गात् पूर्व आदिरुदात्तः। काकः। वृकः। शुकेषु मे। प्राणिनां किं। उदकं। खय्युवर्णं कृत्रिमाख्या चेत्। खयि परे व
र्णमुदात्तं स्यात्। कंदुकः। उनर्वन्नंतानां। उन। वरुणं वो रिशादसं। अ। स्वसारत्वा कृण्वे। वन्। पीवानं मेषं। वर्णा
नां तणतिनितांतानां। आदिरुदात्तः। एतः। हरिणः। शितिः। पृश्निः। हरित्। ह्रस्वांतस्य ह्रस्वमनृत्तच्छील्ये। अ

सि॰ कौ॰
२४
24

द्वन्द्वे घि स्वांतस्यादि भूतं रूपमुदाहरणं स्यात्। मुनिः॥ अल्पस्वरस्यादेवनस्य। आदिरुदाहरणं॥ तस्य नाम॥ देवनेनु॥ अजे
र्थादि॥ अर्थ॥ अर्धस्या समस्य घोतने। अर्द्धे ग्रामस्य। समर्थे शाकेनु अर्धद्विपस्य॥ पीताम्बरानां। आदिरुदाहरणः। पीतद्रु
मरल॥ ग्रामादीनां च। ग्रामः सोम॥ याम॥ लुब्धं तस्योपमेयनामधेयस्य। वंचैव वंचो। स्फिगं तस्येति पाठांतरं। स्फि
गितिलुप॥ प्रावांमंज्ञा। नद्यद्रिपर्वतविशेषव्याघ्रसिंहमहिषाणां। एषामुपमेयनाम्नामादिरुदाहरणेन· नालइवना
लः। मेरुरिवमेरु॥ व्याघ्रः। सिंहः महिषः। राजविशेषस्य यमश्चावेत। यमन्वा हृदह॥ अग्रमउदाहरणं। अगाः प्रमुदा
हरणं। लघ्वावृत्ते द्वयोश्च बहुषो गुरुः॥ अन्ते लघोर्द्वयोश्च लघ्वोः मनोर्वक्षस्य गुरुरुदाहरणं॥ कल्याणः। कोलाहलः
स्त्रीविषयवर्णाल्लघुपूर्वाणि। एषां त्रयाणामाद्युदाहरणं॥ स्त्रीविषय· मल्लिका। वर्ण· श्येनी· हरिणी। अस्तुशद्दात्
पूर्वोक्तेषां तेऽल्पपूर्वाणि तरस्तु॥ शकुनीनां च लघुपूर्वं। पूर्वं ल्लघु उदाहरणं स्यात्। कुक्कुटः। तित्तिरिः। नतु प्राणा राम
स्मापां। यथालक्षणं प्राप्तमुदाहरणं त्वन्त्व· वसंतः। ककलासः। धान्यानां च बहुद्रव्यानां तानां। आदिरुदाहरणं॥ कानानां। २४
शपामाकाः॥ षांतानां। माषाः॥ जनपदशद्दानामषंतानां। केकयः। हयादीनामसंयुक्तलांतानामंतः पूर्वं वा। हयि

तिहलः संज्ञा। पललं। शललं। हयादीनां किं। एकलः॥ असंयुक्ते इति किम्। मल्लः॥ इगंतानां च द्व्यषां। आदिरुदा
त्तः॥ कृषिः॥ इति द्वितीयः पादः॥ ॥अथ द्वितीयं प्राग। षात्। इषां तस्य हलादेरित्यातः॥ प्राग्द्वितीयाधिकारः॥
अषां प्राङ्मकरात्। मकरवरूढेत्यतः॥ प्राक् अद्यामित्यधिकारः॥ स्वांगानामकुर्वादीनां। कवर्गरेफवकारादीनि
वर्नीयित्वा अर्थं स्वां गानां द्वितीयमुदात्तं। ललाटम्। कुर्वादीनां तु। कपोलः। रसना। वदनं। मादीनां च। मलयः। म
करः। शादीनां शाकानां। शीतन्या। शतपुष्पा। पांना नां गुर्वादीनां। पादपः। आतपः। लघ्वादीनां तु अनूपं। द्यवांतु
नीघं। युतान्यण्यंतानां। युत अयुतं। अनि। धमनिः॥ आणि। विपणिः॥ मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाक
लोमाकाष्ठापेष्ठाकाशीनामादिर्वा। एषामादिर्द्वितीयो वोदात्तः॥ मकरः॥ वरूढ इति। छंदसि च। अमकराद्यर्थमा
रंभः॥ लक्ष्याक्षसारादादिर्द्वितीयं वोदात्तं। उर्वी। कर्दमादीनां च। आदिर्द्वितीयं वोदात्तं। सुगंधितेजनस्पतेवा। आ
दिर्द्वितीयंते राह्नृक्ष्वेतित्रयः पर्यायेणोदात्ताः॥ सुगंधितेजनाः॥ नपःफलांतानां। आदिर्द्वितीयं वोदात्तं। राजाद्न
फलं। यांतस्यांत्यात्पूर्वं कुलायः॥ थांतस्य च नालघुनी। नाशह्रो लघु वडुदात्तेमः॥ सनाथासभा। शिंशमारोडुंब

सि॰ वै॰ रवली वर्देश्वार पुरूरवसां च॰ अंतात्पूर्वमुदात्तं द्वितीयं वा। सां काश्यपकौ पिल्मनामि क्यदार्वघाटानां। द्विती
२५ यमुदात्तं वा। ईषान्तस्य हयादेरादिर्वा। हलीषा। लांगलीषा। उशीरदाशेरकपालपलालशैवालश्यामाकश
25 रीरशरावहृदयहिरण्यारण्यापत्यदेवराणां। एषामादिरुदात्तः स्यात्। महिष्याषाढयोर्जायेष्टकाख्यादेश्च।
आदिरुदात्तः। महिषीजाया। अषाढानुपधाति॥ ॥इति तृतीयः पादः॥ ॥शकटिशकट्योरक्षरमक्षरं पर्या
येण। उदात्तं॰ शकटिः १ शकटी २। गोष्ठजस्य ब्राह्मणनामधेयस्य। अक्षरमक्षरं पर्यायेणोदात्तं। गोष्ठजः ब्राह्म
णः। अन्यत्र गोष्ठजः पशुः। कुंडुन्नरपदस्य कृतिस्वरेणांतोदात्तः। पारावतस्योपोत्तममवर्जम्। शेषं क्रमेणोदात्तं॰ पा
रावतः। धूम्रजानुमुंजकेशकालवालस्थालीपाकानामधूजलस्थानां। एषां चतुर्णां धूप्रभृतीनां चतुरोवर्जयित्वा
शिष्टानि क्रमेणोदात्तानि। धूम्रजानुः। मुंजकेशः। कालवालः। स्थालीपाकः। कपिकेशहरिकेशयोश्छंदसि। राम
कपिकेशः। हरिकेशः। न्यङ्स्वरौ स्वरितौ। स्पष्टं। न्यङ्। तानः। व्यचलपत्वः। न्यर्बुदव्यल्कशयोरादिः। स्वरितः २५
स्यात्। तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामंतः। स्वरितः स्यात्। तिलानां भवनं क्षेत्रं तिल्यं॰ यतो

नावइतिप्राप्ते। विल्वमस्यवीर्यालिक्छंदसि। अंतोदस्वरितानि। त्वस्त्वसमसिमेत्यनुद्यानि। स्मरीत्वतः उ
नूः नमंत्रामन्यकेसमे। सिमस्मै। सिमस्याथर्वणोऽंतउदात्तः। आथर्वणइतिप्रातिपदिकं। तत्रदृष्टस्येत्येवंपदेदिति
नत्वासमस्तमनुत्तेसिमस्मेइत्यृग्वेदेपिभवत्येव। निपाताआद्युदात्ताः४। स्वाहा। उपसर्गाश्चाभिवर्जम्। एवादीनामंतः
एवमादीनामितिपाठांतरं·एव·एवं·नूनं·सह। तेपुत्रसूरिभिः। षष्ठस्यतृतीयेसहस्यसइतिप्रकरणेसहशब्द
आद्युदात्तइतिनुप्रांत४। नद्विसं। वावादीनामुभावुदात्तौ। उभौग्रहणमनुदात्तंपदमेकवर्जमिति तस्यबाधाय।
वाद्ययोनुदात्ताः४। स्तथं·यथेतिपादांते। तंनेमिमृभवोयथा। पादांतेकिं। यथानोअदितिःकरत्। प्रकारादिद्वि
रुक्तौपरस्यांतउदात्तः। पटुपटुः। शेषंसर्वमनुदात्तं। शेषंनित्यादिद्विरुक्तस्यपरमित्यर्थः। प्रप्रायं। दिवेदिवे॥
॥ ॥इतिशांतनवाचार्यप्रणीतेफिट्सूत्रेषुतुरीयःपादः४॥ ॥आद्युदात्तश्च। प्रत्ययआद्युदात्तःस्यात्। अ
ग्निः। कर्तव्यं। अनुदात्तौसुप्पितौ। पूर्वस्यापवादः। यज्ञस्य। नयोपुच्छति। शप्तिपोरनुदात्तत्वेस्वरितप्रवयो। वि
तः। अंतउदात्तः। वितःसप्रकृतेर्वृद्धकजर्थं। वितिप्रत्ययेमतिप्रकृतिप्रत्ययसमुदायस्यांतउदात्तोवाच्यइत

सि० वै०
२६
26

र्थः॥ नसंज्ञामन्यकोयकेसरस्वती॥ नकस्मुनोनङ्किनस्या। वितस्तद्धितस्यांतउदात्तः॥ पूर्वेणासिद्धेजित्स्वरबाधना
र्थमिदं। कोऽज्ञायता॥ कितः॥ कितस्तद्धितस्यांतउदात्तः॥ यदाग्नेयः॥ तिसृभ्यो जसः॥ अंतउदात्तः॥ तिस्रो घावः
सवितुः॥ साधेकाचस्तृतीयादिविभक्तिः॥ सुसप्तमीबहुवचनं। तत्र यण् एकाचः ततः परा तृतीयादिविभक्तिरुदात्ता।
वाचा विरूपः॥ सो किं। राज्ञेत्यादो एकाचो विराजशब्दात्परस्यमाभूत्। राज्ञो नु ते। विधजेराजनित्वे। तृतीयादिः किं।
न ददर्श वाचं। अंतोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे। नित्याधिकारविहितसमासादन्यत्र यदुत्तरपद
मंतोदात्तमेकाच् ततः परा तृतीयादिविभक्तिरंतोदात्ता वा स्यात्॥ परमवाचा॥ अंचेश्छंदस्यसर्वनामस्थानं।
अंचेः परा विभक्तिरुदात्ता। इंद्रो दधीचः॥ चावितिपूर्वपदांतोदात्तत्वं प्राप्तं। तृतीयादिरित्यनुवर्तमाने ऽसर्वना
मस्थानग्रहणं शस्परिग्रहार्थं। प्रतीचो बाहून्॥ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः॥ एभ्यो ऽसर्वनामस्थानं विभक्तिरु
दात्ता। प्रष्ठौहः॥ प्रष्ठौहा॥ ऊठ्युपधाग्रहणं कर्तव्यं। इह माभूत्। अक्षद्युवा। अक्षद्युवे। इदम्। एभिर्न[illegible] म
सः॥ अन्वादेशे नांतोदात्तादित्यनुवृत्तेः। नवनतत्रांतोदात्तताप्रसक्तीतिवाच्यं। इदमो ऽन्वादेशे ऽशनुदात्तस्तृ[illegible]ल्यं त्यजो

निहत्वेणानुदात्तस्य अशो विधानात्। अन्ते वत्रः। मास्यांणा। अनु। पद्दन्नोमासहृन्निशङ्‌इति पद्दूपदादयः। धना
दद्भिर्न जिह्वा। जायते मासि मासि। मनस्थिन्मेहृश्या। अपु। अपां फेनेन। पुमः। अभ्रातेव पुंसः। रै। राया वयं। रायेध
त्ता। दिव। दिवे दिवे। अष्टनो दीर्घात्। शसादिविभक्तिरुदात्तः। अष्टाभिर्दशभिः॥ शतुरनुमो नद्यजादी। अनुमय॥
शतृप्रत्ययः तदंतादंतोदात्तात्परा नदी अजादि शसादिविभक्तिरुदात्ता स्यात्। अच्छ रवं प्रथमा जानती।
कृण्वते। अंतोदात्तात्। किं। दधती। अभ्यस्तानामादिरिस्ता घुदात्त॥ अनुमः किं। तुदंती। एकादेश उदात्तः। अनु
पदेशात्परत्वात् शतुर्लसार्वधातुक इति निघातः॥ उदात्तयणो हल्पूर्वात्। उदात्तस्थाने यो यण् हलपू
र्वस्तस्मात्परा नदी शसादिविभक्तिश्चोदात्ता स्यात्। चोदयित्री सूनृतानां। एवं नेत्री। कृतं देवाय कृण्व
ते सवित्रे। नोङ्धात्वोः। अनयोर्यणः परे शसादय उदात्ता न स्युः॥ ब्रह्मबंधा। सैत्स्विभिः सुभ्वो। ह्रस्वनुड्भ्या
मतुप्। ह्रस्वांतादंतोदात्तान्नुटश्च परो मतुबुदात्तः। यो अग्निमां उदनिर्मार्ड्‌इयत्तिं नुट॥ अक्षण्वंतः। अंतो
दात्तात्किं। मात्वा विदद्दिषुमान्। स्वरविधौ व्यंजनमविद्यमानवदित्येतदत्र न। मरुत्वा वायवागहि

सि०कौ० रेशाद्वाद्य॰रेवाड्ड्डेवञ्जः॥नामन्यतरस्यां॥मनुपियोक्तः स्वस्तदंताद्वंतोदात्तान्नूपरोनामुदात्तोवा॥चेतंनीखु
२७ मतीनां॥आम्ब्रुदसि॥उञः परोनामुदात्तोवा॥देवसेनानाममिनं जतीनां॥चेस्तुकेनेह॥जयतीनांमरुतो
27 यंतु॰षट्त्रिचतुर्भ्योहिलादिः॥एभ्योहलादिर्विभक्तिरुदात्ता॥आषड्भिःईसमानः॥त्रिभिष्टुदेव॥नगोश्वन्साववर्ण
राड्ड्॰क्रुङ्॰क्रुञ्चः॥एभ्यः प्रागुक्तं न॰गवांशतानि॥गोभ्योगानुः॥शुनश्चिच्छेपे॥सोप्रथमैकवचने॥वर्णानाम्॰तेभ्योघुम्न॰
तेषांपाहि----दिवोरुल्लू॥दिवः परा रुलादिर्विभक्तिर्नोदात्ता॥घुभिरक्तुभिः॥ऊलितिकिं॥उपत्वाग्नेदिवेदिवे॥
नृत्वामन्तरस्यां॥नुः पराझलादिर्वोदात्ता॥नृभिर्येमानः॥तिस्वरितं॥निगदव्याख्यातं॥कृनूनं॥तास्यनुदात्तेन्ङिददुप
देशाल्लसार्वधातुकेमनुदात्तमह्विङोः॥अस्मात्परं लसार्वधातुकमनुदात्तंस्यात्॰अनुदात्तेत्॰यश्चास्ते॰ङितः॥
अभिवष्टे अहन्नेभिः॥अदुपदेशात्॰पुरुहूतावनस्यतं॥चित्स्वरोप्यनेनवाध्यते॥वर्द्धमानंस्वेदमे॥तास्यादिभ्यः किं॥
[redacted] अभिष्टघेगृणानः॥उपदेशग्रहणात्नेह॰हनोवृत्राण्यार्या॥लग्रहणं किं॥
कर्त्ताहनिघ्नानाः॥सार्वेतिकिं॥शिश्ये॥अह्विङोः॥किं॥कुते॰यदधीते॥विदाधिखिदिभ्योनेतिवक्तव्यं॥इंधेसन्वान

ञ्यानुदात्तस्य त्वयत्रेति सूत्रेणाद्योस्थितं। आदिःसिचोऽन्यतरस्यां। सिजंतस्यादिरुदात्तो वा। मा सिष्टं वर्तिरि। स्वंतो।
थलि च सेटीडंतो वा। सेटि थलंते पद इडुदात्तः४ अंतो वा आदिर्वा स्यात्। यदा नेनेत्रयः४ तदा लितीति प्रत्ययात्पू
पूर्वमुदात्तं। लुलविथ। अत्र चत्वारो विपर्यायिणो दात्ताः। उपोत्तमं रिति। रित्प्रत्ययांतस्योपोत्तममुदात्तं स्या
त्। यदाहवनीये।। इति प्रत्ययस्वराः४।। ।।समासस्य। अंतउदात्तः४। यज्ञश्रियं। बहुव्रीहौ प्रकृत्या पूर्वपदं। उदा
त्तस्वरितयोगि पूर्वपदं प्रकृत्या स्यात्। सत्यश्चित्रश्रवस्तमः४। उदात्तेत्यादि किम्। सर्वानुदात्ते पूर्वपदे समासांतोदा
त्तत्वमेव यथा स्यात्। समश्रियः४। तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः। सप्तैते पूर्वपद
भूतास्तत्पुरुषे प्रकृत्या। तुल्यश्वेतः। कृत्यतुल्याख्या अजात्येति तत्पुरुषः४। किरिणा काणः४ किरिकाणः४। प
यन्मंदयत्सखं। मंदयति मादके। इडे सखेति सप्तमीतत्पुरुषः४। शस्त्रीश्यामा। अव्यये नञ्कुनिपातानां।
अयज्ञो वा एषः४। परिगणनं किं। स्नात्वाकालकः४। मुहूर्तसुखं। भोज्योष्णं। वर्णो वर्णेष्वनेते।। वर्णवाचिन्युत्तर
पदेऽनेतवर्जिते वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे। कृष्णसारंगः४। लोहितकल्माषः। कृष्णशब्दो नक्प्रत्ययांतः४।

सिं॰ वे॰
५८

लोहितशब्दइतन्नंतः। वर्णः किं। परमकृष्णः। वर्णेषु किं। कृष्णतिलाः। अनेते किं। कृष्णैतः॥ गाधलवणयोः प्रमा
णे। एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या। अरित्रगाधमुदकं। तत्प्रमाणमित्यर्थः।
गोलवणं। यावद्गवे दीयते तावदित्यर्थः। अरित्रशब्द इत्रांतो मध्योदात्तः। प्रमाणमियत्तापरिच्छेदमात्रं। न पु
नरायाममेव। प्रमाणे किं। परमगाधं॥ दायाद्यं दायादे। तत्पुरुषे प्रकृत्या। धनदायादः। धनशब्दः क्युप्रत्ययां
तः प्रत्ययस्वरेणाद्युदात्तः। दायाद्यं किं। परमदायादः॥ ॥ प्रतिबंधि चिरकृच्छ्रयोः। प्रतिबंधवाचि पूर्वपदं प्रकृ
त्या एतयोः परतस्तत्पुरुषे। गमनचिरं। व्याहरणकृच्छ्रं। गमनं कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा
प्रतिबंधि जायते। प्रतिबंधि किं। मूत्रकृच्छ्रं॥ पदेऽपदेशे। व्याजवाचिनि पदशब्द उत्तरपदे पूर्वपदं प्रकृत्या तत्पुरुषे।
मूत्रपदेन प्रस्थितः। उच्चारपदेन। मूत्रशब्दो घञंतः। उच्चारशब्दो घञंतस्थाथादिस्वरेणांतोदात्तः। अपदेशे किं।
विष्णुपदं॥ निवाते वातत्राणे। निवातशब्दे परे वातत्राणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या। कुटीनिवातं। कुड्य
निवातं। कुटीशब्दो गौरादिङीषंतः। कुड्यशब्दो ड्यगंतः। यन्नंत इत्यन्ये। वातत्राणे किं। राजनिवाते वसति। निवात

सि॰ वै॰
२८

शब्दोयं रूढः पार्श्वे। शारदेनार्तवे। ऋतौ भवमार्तवं तदन्यवाचिनि शारदशब्दे परे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्या
त्। रज्जुशारदमुदकं। शारदशब्दो नूतनार्थः। तस्यास्वपदविग्रहः। रज्जोः सद्य उद्धृतं। रज्जुशब्दः सृजेरसुश्चेत्याद्यु
दात्तो व्युत्पादितः। अनार्तवे किं। उत्तमशारदं। अध्वर्युकषाययोर्जातौ। एतयोः परतो जातिवाचिनि तत्पुरुषे पूर्वप
दं प्रकृतिस्वरं॰ कठाध्वर्युः। दौवारिककषायं। कठशब्दः पचाद्यजंतः तस्माद्वैशंपायनांतेवासिभ्यश्चेति णिनेः कठ
चरकाल्लुगिति लुक्। द्वारे नियुक्त इति ठक्ंतोदात्तः। जातौ किं। परमाध्वर्युः। सदृशप्रतिरूपयोः सादृश्ये। अनयोः
पूर्वं प्रकृत्या। पितृसदृशः। सादृश्ये किं। परमसदृशः। समासार्थोत्र पूज्यमानता न सादृश्यं। द्विगौ प्रमाणे। द्विगा
वुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं। प्राच्यसप्तसमः। सप्तसमाः प्रमाणमस्य। प्रमाणे लो द्वि
गोर्नित्यमिति मात्रचो लुक्। प्राच्यशब्द आद्युदात्तः। प्राच्यश्चासौ सप्तसमश्च प्राच्यसप्तसमः। द्विगौ किं। व्रीहिप्रस्थः।
प्रमाणे किं। परमसप्तसमः। गंतव्यपण्यं वाणिजे। वाणिजशब्दे परे तत्पुरुषे गंतव्यवाचि पूर्वपदं प्रकृतिस्वरं। म
द्रवाणिजः। गोवाणिजः। सप्तमीसमासः। मद्रशब्दो रक्प्रत्ययांतः। गंतेति किं। परमवाणिजः। मात्रोपज्ञोपक्रम

सि० वै० छायेनपुंसके।मात्रादिषुपरतो नपुंसकवाचिनितत्पुरुषे तथा। भिक्षायास्तुल्यप्रमाणं भिक्षामात्रं। भिक्षाश
२९ ब्दोगुरोश्चहलइत्यप्रत्ययांतः। पाणिनुपज्ञं। पाणिनिशब्दोऽन्तोदात्तः। नंदोपक्रमं। नंदशब्दः पचाद्यजंतः। इक्षुछा
यां। इक्षुशब्दः क्साद्युदात्तो नित्स्वरात्। नपुंसके किं। कुड्यच्छाया। सुखप्रिययोर्हिते। एतयोः परयोर्हितवाचिनित
त्पुरुषे तथा। गमनप्रियं। गमनसुखं। गमनशब्दे ल्तिस्वरः। हिते किं। परमसुखं। प्रीतौ च। प्रीतौ गम्यायां प्रागुक्तं।
ब्राह्मणसुखं पायसं। छात्रप्रियोऽनध्यायः। ब्राह्मणछात्रशब्दौ प्रत्ययस्वरेणांतोदात्तौ। प्रीतौ किं। राजसुखं। स्व
स्वामिनि।। स्वामिशब्दे परे स्ववाचिपूर्वपदं तथा। गोस्वामी। स्वे किं। परमस्वामी। पत्यावैश्वर्ये। दमूनागृहपतिर्दमे
नभूवाक्चिद्दिधिषु। पतिशब्दे परे ऐश्वर्यवाचिनितत्पुरुषे नैतानि प्रकृत्या। भुवः पतिः भूपतिः। वाक्पतिः। चित्प
तिः। दिधिषूपतिः। वा भुवनं।। उक्तविषये भुवनपतिः। राभूसूधूभ्राजिभ्यश्छंदसीति क्युन्नंतो भुवनशब्दः। आशंकावाधने
दीयस्सु संभावने। अस्तित्वाध्यवसायः संभावनं। गमनाशंकमस्ति। गमनावाधं। गमननेदीयः। गमनमाशंक्यते आ" राम
वाध्यते निकटतरमिति वा संभाव्यते। संभावने किं। परमनेदीयः। पूर्वे भूतपूर्वे। आढ्यो भूतपूर्वः आढ्यपूर्वः। पूर्वशब्दो २९